# Shri Mahalakshmistutih 2

# श्रीमहालक्ष्मीस्तुतिः २

## Document Information

Text title : mahAlakShmIstutiH 2

File name : mahAlakShmIstutiH2.itx

Category : devii, lakShmI, aShTottarashatanAma

Location : doc_devii

Proofread by : PSA Easwaran psawaswaran at gmail.com

Description/comments : Edited by S. V. Radhakrishna Shastriji

Acknowledge-Permission: Mahaperiaval Trust

Latest update : January 4, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

January 4, 2020

*sanskritdocuments.org*

# श्रीमहालक्ष्मीस्तुतिः २

महालक्ष्म्यष्टोत्तरशतनामस्तोत्रम्
ॐ विघ्नेश्वरमहाभाग सर्वलोकनमस्कृत ।
मयाऽऽरब्धमिदं कर्म निर्विघ्नं कुरु सर्वदा ॥
शुद्धलक्ष्म्यै बुद्धिलक्ष्म्यै वरलक्ष्म्यै नमो नमः ।
नमस्ते सौभाग्यलक्ष्म्यै महालक्ष्म्यै नमो नमः ॥ १॥

वचोलक्ष्म्यै काव्यलक्ष्म्यै गानलक्ष्म्यै नमो नमः ।
नमस्ते शृङ्गारलक्ष्म्यै महालक्ष्म्यै नमो नमः ॥ २॥

धनलक्ष्म्यै धान्यलक्ष्म्यै धरालक्ष्म्यै नमो नमः ।
नमस्तेऽष्टैश्वर्यलक्ष्म्यै महालक्ष्म्यै नमो नमः ॥ ३॥

गृहलक्ष्म्यै ग्रामलक्ष्म्यै राज्यलक्ष्म्यै नमो नमः ।
नमस्ते साम्राज्यलक्ष्म्यै महालक्ष्म्यै नमो नमः ॥ ४॥

शान्तलक्ष्म्यै दान्तलक्ष्म्यै क्षान्तलक्ष्म्यै नमो नमः ।
नमोऽस्त्वात्मानन्दलक्ष्म्यै महालक्ष्म्यै नमो नमः ॥ ५॥

सत्यलक्ष्म्यै दयालक्ष्म्यै सौख्यलक्ष्म्यै नमो नमः ।
नमः पातिव्रत्यलक्ष्म्यै महालक्ष्म्यै नमो नमः ॥ ६॥

गजलक्ष्म्यै राजलक्ष्म्यै तेजोलक्ष्म्यै नमो नमः ।
नमः सर्वोत्कर्षलक्ष्म्यै महालक्ष्म्यै नमो नमः ॥ ७॥

सत्त्वलक्ष्म्यै तत्त्वलक्ष्म्यै बोधलक्ष्म्यै नमो नमः ।
नमस्ते विज्ञानलक्ष्म्यै महालक्ष्म्यै नमो नमः ॥ ८॥

स्थैर्यलक्ष्म्यै वीर्यलक्ष्म्यै धैर्यलक्ष्म्यै नमो नमः ।
नमस्तेऽस्त्वौदार्यलक्ष्म्यै महालक्ष्म्यै नमो नमः ॥ ९॥

सिद्धिलक्ष्म्यै ऋद्धिलक्ष्म्यै विद्यालक्ष्म्यै नमो नमः ।

नमस्ते कल्याणलक्ष्म्यै महालक्ष्म्यै नमो नमः ॥ १०॥

कीर्तिलक्ष्म्यै मूर्तिलक्ष्म्यै वर्चोलक्ष्म्यै नमो नमः ।
नमस्ते त्वनन्तलक्ष्म्यै महालक्ष्म्यै नमो नमः ॥ ११॥

जपलक्ष्म्यै तपोलक्ष्म्यै व्रतलक्ष्म्यै नमो नमः ।
नमस्ते वैराग्यलक्ष्म्यै महालक्ष्म्यै नमो नमः ॥ १२॥

मन्त्रलक्ष्म्यै तन्त्रलक्ष्म्यै यन्त्रलक्ष्म्यै नमो नमः ।
नमो गुरुकृपालक्ष्म्यै महालक्ष्म्यै नमो नमः ॥ १३॥

सभालक्ष्म्यै प्रभालक्ष्म्यै कलालक्ष्म्यै नमो नमः ।
नमस्ते लावण्यलक्ष्म्यै महालक्ष्म्यै नमो नमः ॥ १४॥

वेदलक्ष्म्यै नादलक्ष्म्यै शास्त्रलक्ष्म्यै नमो नमः ।
नमस्ते वेदान्तलक्ष्म्यै महालक्ष्म्यै नमो नमः ॥ १५॥

क्षेत्रलक्ष्म्यै तीर्थलक्ष्म्यै वेदिलक्ष्म्यै नमो नमः ।
नमस्ते सन्तानलक्ष्म्यै महालक्ष्म्यै नमो नमः ॥ १६॥

योगलक्ष्म्यै भोगलक्ष्म्यै यज्ञलक्ष्म्यै नमो नमः ।
क्षीरार्णवपुण्यलक्ष्म्यै महालक्ष्म्यै नमो नमः ॥ १७॥

अन्नलक्ष्म्यै मनोलक्ष्म्यै प्रज्ञालक्ष्म्यै नमो नमः ।
विष्णुवक्षोभूषलक्ष्म्यै महालक्ष्म्यै नमो नमः ॥ १८॥

धर्मलक्ष्म्यै अर्थलक्ष्म्यै कामलक्ष्म्यै नमो नमः ।
नमस्ते निर्वाणलक्ष्म्यै महालक्ष्म्यै नमो नमः ॥ १९॥

पुण्यलक्ष्म्यै क्षेमलक्ष्म्यै श्रद्धालक्ष्म्यै नमो नमः ।
नमस्ते चैतन्यलक्ष्म्यै महालक्ष्म्यै नमो नमः ॥ २०॥

भूलक्ष्म्यै ते भुवर्लक्ष्म्यै सुवर्लक्ष्म्यै नमो नमः ।
नमस्ते त्रैलोक्यलक्ष्म्यै महालक्ष्म्यै नमो नमः ॥ २१॥

महालक्ष्म्यै जनलक्ष्म्यै तपोलक्ष्म्यै नमो नमः ।
नमः सत्यलोकलक्ष्म्यै महालक्ष्म्यै नमो नमः ॥ २२॥

भावलक्ष्म्यै वृद्धिलक्ष्म्यै भव्यलक्ष्म्यै नमो नमः ।
नमस्ते वैकुण्ठलक्ष्म्यै महालक्ष्म्यै नमो नमः ॥ २३॥

नित्यलक्ष्म्यै सत्यलक्ष्म्यै वंशलक्ष्म्यै नमो नमः ।
नमस्ते कैलासलक्ष्म्यै महालक्ष्म्यै नमो नमः ॥ २४॥

प्रकृतिलक्ष्म्यै श्रीलक्ष्म्यै स्वस्तलक्ष्मै नमो नमः ।
नमस्ते गोलोकलक्ष्म्यै महालक्ष्म्यै नमो नमः ॥ २५॥

शक्तिलक्ष्म्यै भक्तिलक्ष्म्यै मुक्तिलक्ष्म्यै नमो नमः ।
नमस्ते त्रिमूर्तिलक्ष्म्यै महालक्ष्म्यै नमो नमः ॥ २६॥

नमश्चक्रराजलक्ष्म्यै आदिलक्ष्म्यै नमो नमः ।
नमो ब्रह्मानन्दलक्ष्म्यै महालक्ष्म्यै नमो नमः ॥ २७॥

ॐ कनकलक्ष्म्यै नमः ।
उद्योगलक्ष्म्यै नमः ।
सर्वाभीष्टफलप्रदायै नमः ।

इति श्रीमहालक्ष्मीस्तुतिः २ समाप्ता ।

Proofread by PSA Easwaran psaeaswaran at gmail.com

---

*Shri Mahalakshmistutih 2*

pdf was typeset on January 4, 2020

Please send corrections to *sanskrit@cheerful.com*